
संस्कृतवर्षस्मृतिग्रन्थमाला-२

प्रधानसम्पादकः

**प्रो० वेम्पटि कुटुम्बशास्त्री**

# उत्तिष्ठत जागृत

[illegible] विवेकानन्दस्य वीरवाणी



सङ्ग्राहकः

**एकनाथ रानडे**

अनुवादिका

**नागरत्ना हेगडे**

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# सङ्ग्राहकवचनम्

सद्यः अतीतेषु शतकेषु सनातनधर्मस्य जीवनसन्देशं समग्रं प्रपञ्चं प्रापयितुं प्रयासं कृतवत्सु हिन्दुधर्मप्रसारकेषु गुरुदेवस्य रामकृष्णस्य वरशिष्यः विवेकानन्दः एव अग्रगण्यः । सः आसीत् कश्चन अपूर्वः देशभक्तः । स आसीत् समाजपरिष्कारकः सङ्घटकश्च । राष्ट्रियपुनरुत्थानशक्तीः उज्जागरय्य आंग्लशासनस्य प्रथमप्रहारात् एव त्रस्ततां गतस्य पराभूतस्य देशस्य पुनरुत्थानाय मार्गं सुगमं कृतवत्सु सः एव आसीत् आद्यः । राष्ट्रस्य प्राणबिन्दुरूपं धर्मं प्रति देशस्य अवधानम् आकृष्य भारतस्य पुनरुज्जीवनाय आधारशिलां स्थापितवान् महात्मा सः एव । धर्मः अवलम्बितः चेदेक हिन्दुराष्ट्रीयजीवितोद्देशानुगुणं सङ्घटनं कर्तुं शक्यम् इत्येतम् अंशं देशम् अवगमितवान् क्रान्तदर्शी सः एव ।

स्वामिना विवेकानन्देन ज्ञापितः - शक्तिसन्देशः । शारीरकी मानसिकी साङ्कल्पिकी चेति त्रिविधाभिः शक्तिभिः उपेतः सर्वतोमुखः सन्देशः तस्य । अस्माकं देशे अद्य नितराम् आवश्यकी अस्ति एतादृशी एव सर्वतोमुखी शक्तिः । 'अयःसदृशाः मांसखण्डाः, अयोमय्यः नाड्यः, तडिद्गुणानि मनांसि च राष्ट्रशरीरस्य भवेयुः' इति विवेकानन्दस्य आशयः आसीत् । शक्तिं, पौरुषं, क्षात्रं वीर्यं, ब्राह्मं तेजः च अस्मद्देशबान्धवाः सम्पादयेयुः इति तस्य तीव्रा आकांक्षा आसीत् । अद्य वस्तुतः अपेक्षिताः अंशाः एते एव । किन्तु दौर्भाग्यं नाम स्वातन्त्र्यप्राप्तेः अनन्तरम् अस्माभिः निरन्तरं निन्दिताः उपेक्षिताः च गुणाः एते एव । तावदेव न, परकीयानां जडवादितत्त्वज्ञानं भोगवादिजीवनं च सर्वस्वं मन्यमानाः वयं तयोः दासाः जाताः ।

स्वामी विवेकानन्दः स्वस्य समग्रस्य बोधनस्य साररूपेण एकं महामन्त्रं दत्तवान् । स च अस्ति - भगवति आत्मनि च श्रद्धा करणीया इति । 'अहम् आत्मा अस्मि । न कोऽपि खड्गः मां न खण्डयितुम् अर्हति, न किमपि शस्त्रं मां वेद्धुं शक्नोति । न माम् अग्निः दहति, वायुः शोषयति वा । सर्वसाक्षी सर्वज्ञः अस्मि अहम्' इत्येषः उपनिषद्भिः घोष्यमाणः महासत्यसिद्धान्तः एव आत्मश्रद्धायाः आधारः । विवेकानन्दः स्वदेशबान्धवान् एताम् एव श्रद्धां बोधितवान् । तस्य सर्वेषु अपि उपदेशेषु सन्देशेषु च दृश्यमानस्य जीवनगीतस्य 'ध्रुवपदम्' एतत् एव । एतत् सत्यमर्म अवगत्य तदनुगुणं जीवितुम् इतः परं वा प्रयासं कुर्याम ।

# विषयानुक्रमणिका


**प्रथमः भागः**

**सन्देशः**

१. अस्माकं पुण्यभूमिः, तस्याः उज्ज्वलः इतिहासश्च । ....०३
२. आदिकालतः अद्यपर्यन्तम् । ....१३
३. धर्मः - भारतस्य आत्मा । ....२४
४. पुनरुत्थानकार्यम् - आधारस्तम्भः
दिग्दर्शनं च । ....३३
५. भारतस्य पुनरुत्थानम् । ....६०
६. पुनरुत्थानमहाकार्यम् - १
(मूलशिलायाः निर्मितिः) ....७२
७. पुनरुत्थानमहाकार्यम् - २
(कार्ययोजना) ....९०

**द्वितीयः भागः**

**सम्भाषण-प्रवचन-लेखेभ्यः उद्धृतम्**

- हिन्दुधर्मस्य व्याप्तिः । ....१११
- स्वधर्मरक्षणार्थं सन्नद्धाः भवन्तु । ....११३
- भारतीयस्त्री - भूते, वर्तमाने, भविष्यति च । ....११४
- भारतपाश्चात्त्यदेशयोः स्त्रियः । ....११९
- आर्यनागरिकताः ऐरोप्यनागरिकताः च । ....१२१
- भाविभारतस्य सङ्केतदीपः - शिवच्छत्रपतिः । ....१२५

शुचित्वम् अत्यावश्यकम् ।

गुरोः विषये अस्माभिः आदौ परिशीलनीयः अंशः नाम तस्य व्यक्तित्वं, तदीयानि वचनानि च । यतो हि गुरुः शक्तिदाता इव । स्वस्मिन् आध्यात्मशक्तिः नास्ति चेत् सः शक्तितरङ्गान् इतरेषु कथं वा वाहयेत् ? उदाहरणार्थं 'हीटर्'यन्त्रम् एव परिशीलयाम । तत् यन्त्रं स्वयम् उष्णं यदि भवति तर्हि एव उष्णतरङ्गान् इतरेषु वाहयितुं समर्थं भवति । नो चेत् न । एवमेव गुरोः मनसि स्थिताः तरङ्गाः छात्रस्य मनः प्रापणीयाः चेत् गुरौ तादृशी शक्तिः अपेक्षिता एव । अयं शक्तिदानस्य प्रश्नः । अस्माकं बौद्धिक-शक्तिचालनमात्रं गुरुणा न क्रियते, अपि तु वास्तविकी अनुभवसाक्षिणी काचित् शक्तिः गुरुणा शिष्याय दीयते । अपि च सा शक्तिः शिष्यस्य हृदये वर्धमाना तिष्ठति । अतः गुरोः अन्तरङ्गम् अत्यन्तं परिशुद्धम् अपि स्यात् । एतत् अत्यावश्यकम् ।

वयं बहूनि उत्कृष्टानि भाषणानि शृणुमः । तर्कशुद्धानि व्याख्यानानि श्रुतवन्तः स्याम । किन्तु गृहं गत्वा तत्सर्वं विस्मरामः । किन्तु कदाचित् अत्यन्तं सरलया शैल्या उक्तानि कानिचन पदानि अस्माकं हृदयं स्पृष्ट्वा अस्माकं जीवने महत् परिवर्तनं जनयन्ति । यैः शब्दैः मनुष्यः स्वस्य व्यक्तित्वं निरूपयति, तेषु शब्देषु शक्तिः भवति । किन्तु व्यक्तित्वम् अपि तावत् उन्नतं स्यात् । शिक्षणं नाम आदानप्रदानयुक्तः कश्चन प्रकारः । गुरुः ददाति, शिष्यः स्वीकरोति । तदर्थं कस्यचित् समीपे दानयोग्यं किञ्चित् स्यात् । अपरः कश्चित् उन्मुक्तहृदयान्तरङ्गः स्वीकर्ता स्यात् ।

## गुरोः कर्तव्यम्

१. मानवे अभिजातपरिपूर्णतायाः अभिव्यक्तिः या भवति सा एव विद्याभ्यासः नाम ।
२. मानवे अभिजातदिव्यतायाः आविर्भावः यः भवति सः एव धर्मः नाम ।